CBSE Class 12 Sanskrit Core 2007 - 22

Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

Time Allowed: 3 Hours **Maximum Marks: 100**

General Instructions

(i) अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।

(ii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

(iii) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।

(iv) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(v) खण्ड क — 10 अङ्काः; खण्ड ख — 15 अङ्काः; खण्ड ग — 30 अङ्काः।

(vi) खण्ड घ — पठितांश-अवबोधनम् 35 अङ्काः; सामान्यः संस्कृतसाहित्यपरिचयः 10 अङ्काः।

Section खण्ड क — अपठितांश-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

विगतशताब्दीतः प्रभृति वैज्ञानिकी प्रगतिः सततं प्रवर्धते। सर्वेषु क्षेत्रेषु नूतनाः आविष्काराः विधीयन्ते। पुरा यत् असम्भवं प्रतीयते स्म, तत् साम्प्रतम् अतीव सुकरं जातम्। पुरा महाभारतयुद्धं संजयः स्वदिव्यदृष्ट्या प्रत्यक्षमिव अकरोत्। इदानीं च सर्वेषु गृहेषु दूरदर्शन-यन्त्रं वर्तते। वयं सर्वे एतन्माध्यमेन दूरस्थक्षेत्रे समायोज्यमानानां कार्यक्रमाणां साक्षात् प्रसारणं पश्याम:। परम् अनया वैज्ञानिक्या प्रगत्या काचिद् हानिरपि संवृत्ता। वैज्ञानिकैः परमाणुक्षेत्रे या प्रगतिः कृता, ततः अद्य समस्तमपि जगद् भीतमिव दृश्यते। परमाणुशक्तेः विकासः विद्युदुत्पादने तु श्रेष्ठः, परं यदा संहारकाणां परमाण्वस्त्राणाम् उत्पादनं विधीयते, तदा नूनं सकलमानवताकृते भयावहम्। अत एव प्रबुद्धा नागरिकाः परमाणुशस्त्रास्त्रविमुक्तं विश्वं कामयन्ते।।

प्रश्नाः:

(अ) एकपदेन उत्तरत:
(i) कीदृशी प्रगतिः सततं प्रवर्धते?
(ii) पुरा यत् असम्भवं तत्साम्प्रतं कीदृशं जातम्?
(iii) केन माध्यमेन दूरस्थकार्यक्रमाणां प्रसारणं पश्यामः?
(iv) कया प्रगत्या काचिद् हानिरपि संवृत्ता?

(ब) पूर्णवाक्येन उत्तरत:
(i) प्रबुद्धाः नागरिकाः किं कामयन्ते?
(ii) पुरा संजयः किम् अकरोत्?

(स) 'एतन्माध्यमेन' अत्र 'एतत्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(द) यथानिर्देशम् उत्तरत:
(i) 'संहारकाणां परमाण्वस्त्राणाम्' अत्र विशेषणपदं किम्?
(ii) 'संजयः प्रत्यक्षमिव अकरोत्' इत्यत्र कर्तृपदं किम्?
(iii) 'लाभः' इत्यस्य अत्र विलोमपदं किम्?

(य) अस्य गद्यांशस्य समुचित शीर्षकं संस्कृतेन लिखत।

Section खण्ड ख — संस्कृतेन रचनात्मककार्यम्

2. दीपावली पर्वणः अवसरे मित्रं गृहे निमन्त्रयितुम् अधोलिखितपत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थापूर्तिं कुरुत -

अमृतसरत:

प्रिय मित्र गोविन्द!

सप्रेम _____ (i)

अत्र कुशलं तत्राप्यस्तु। आगामिमोसे मम _____ (ii) सम्पन्नतां प्रयाति। तदनन्तरं च _____ (iii) भविष्यन्ति। एतेषु दिनेषु _____ (iv) दीपावली समापतति, तदा अस्य नगरस्य _____ (v) विशिष्टैब भवति। सुवर्णमन्दिरं नानावर्णोपेतैः विद्युद्दीप-पङ्क्तिभिः _____ (vi)। दीपालंकृतस्य सुवर्णमन्दिरस्य प्रतिबिम्बं यदा सरसि समापतति, तदा अद्भुतं _____ (vii) दृश्यं जायते। एतदवसरे त्वया अत्र नूनं _____ (viii)। अंह त्वां सर्वाणि _____ (ix) दर्शयिष्यामि। माता-पितृ-चरणेषु प्रणामाञ्जलिः।

तव _____ (x) सखा नचिकेताः।

मञ्जूषा: अभिन्नहृदयः, नमो-नम, दर्शनीयस्थानानि, परीक्षा, समागन्तव्यम्, अवकाशदिनानि, नयनाभिरामम्, सुशोभते, शोभा, प्रकाशपर्व।

3. मञ्जूषा-प्रदत्त-शब्दसूचीसाहाय्येन लघुकथांशं पूरयित्वा पुनः लिखत -

कथ्यते यद् (i) _____ दिशि महिलारोप्यं नाम (ii) _____ आसीत्। तत्र (iii) _____ नामको राजा शासनं करोति स्म। यद्यपि तस्य (iv) _____ वैभवपरिपूर्णमासीत्, परं राजा (v) _____ न लाभते स्म। तस्य चत्वारः (vi) _____ राजनीतिकज्ञानशून्या: आसन्। मम (vii) _____ इदं विशालं राज्यं कः द्रक्ष्यतीति (viii) _____ तं सदैव बाधते स्म। तस्य चिन्तां (ix) _____ विष्णुशर्मणा पञ्चतन्त्रं लिखितम्। विश्वसाहित्ये अस्य (x) _____ स्थानमस्ति।

मञ्जूषा: महत्त्वपूर्णम्, दक्षिणस्याम्, दूरीकर्तुम्, नगरम्, अमरशक्तिः, राज्यम्, निधनानन्तरम्, शान्तिम्, चिन्ता, पुत्राः।

4. अधोलिखितं कमप्येकं विषयमवलम्ब्य पञ्चवाक्येषु संस्कृतेन एकम् अनुच्छेदं लिखित :

रेलयात्रा, हिमालयः, स्वतन्त्रतादिवसः।

Section खण्ड ग — अनुप्रयुक्तव्याकरणम्

5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिविच्छेदं कुरुत -

(i) एतान्यपि सतां गेहे।
(ii) एष भगवान् मणिराकाशमण्डलस्य।
(iii) इत इतो देवः।
(iv) अद्य प्रत्यूष एव।
(v) यदि आर्यस्यानुग्रहः स्यात्।
(vi) जीवत्यनाथोऽपि वने विसर्जित।

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहाः लेखनीयाः -

(i) अहिंसया च भूतात्मा।
(ii) प्रेयान् पुण्डरीकपटलस्य।
(iii) अयमेव अहोरात्रं जनयति।
(iv) स किंसखा साधु न शास्ति योऽधिपम्।
(v) सर्वे यथास्थानम् उपदिशन्ति।
(vi) बहुमत्स्योऽयं ह्रदः।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत-प्रकृति-प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत -

(i) आकाशम् _____। (उत्+वि+ईक्ष्+ल्यप्)
(ii) स्वयमेव देवेन _____। (अव+लोक्+क्त)
(iii) जलाशयं दृष्ट्वा _____ मत्स्यजीविभिः उक्तम्। (गम्+शतृ)
(iv) चित्रे _____ कानि एतानि स्थलानि? (दृश्+(कर्मणि)शानच्)
(v) यदि _____ अस्ति, किं पातकैः। (पिशुन+तल्)
(vi) विद्यालयस्य सूचनापट्टे _____। (वि+ज्ञप्+क्तिन्)
(vii) न निष्प्रयोजनं प्रभुभिः आहूयन्ते _____। (अधिकार+इन्)
(vii) इदम् अभियानं रोचकं _____ चासीत्। (साहस+ठक्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् -

(i) गायत्री अमुमेव _____। (गायति, गायन्ति)
(ii) भो भोः पुरुषाः! चन्दनवारिणा भूमिं _____। (सिञ्चतु, सिञ्चन्तु)
(iii) न प्रयोजनमन्तरा चाणक्यः स्वप्नेपि _____। (चेष्टते, चेष्टसे)
(iv) नेपथ्ये वैतालिकौ काव्यपाठं _____। (कुरुतः, कुरुथः)
(v) किं भवान् अर्थविभवं _____। (चिन्तयसि, चिन्तयति)

OR

OR

8. अधोदत्तेषु वाक्येषु विशेष्यैः सह मञ्जूषाया विशेषणपदानि योजयत -

(i) राज्यं हि नाम _____ नृपस्य कृतेः महत्कष्टदायकम्।
(ii) अशक्तैः _____ शत्रोः प्रपलायनं कर्तव्यम्।
(iii) ग्रीष्मे नीलवर्णा भूमिः _____ जायते।
(iv) वाङ्मात्रेणापि _____ एतत्सरः त्यक्तुं न शक्यते।
(v) एवं _____ भोजनानां दात्री भव।

मञ्जूषा: धूसरवर्णा, बलिनः, शोभनानाम्, धर्मवृत्तिपरकस्य, पितृपैतामहिकम्।

9. अधोदत्तेषु वाक्येषु कोष्ठकपदैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(i) कथं स्पर्धते _____ सह दुरात्मा। (अस्मद्)
(ii) तदलं _____। (सन्ताप)
(iii) पूर्वाभिमुखी पृथिवी _____ प्रति प्रतिवर्षं भ्रमति। (सूर्य)
(iv) अद्य प्रत्यूष एव _____ निष्क्रान्तस्य चञ्चलायते मे अक्षिणी। (गृह)
(v) न खल्वहं नष्टां _____ अनुशोचामि। (श्री)

Section खण्ड घ — पठितांश-अवबोधनम्

10. अधोलिखितं गद्यांशं पठित्वा संस्कृतेन प्रश्नान् उत्तरत -

कस्मिंश्चज्जलाशये अनागतविधाता प्रत्युत्पन्नमतिः यद्भविष्यश्च इति त्रयो मत्स्याः प्रतिवसन्ति स्म। अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भिः मत्सयजीविभिः उक्तम् - अहो बहुमत्स्योऽयं ह्रदः, कदापि न अस्माभिः अन्वेषितः। अद्य तु आहारवृत्तिः सञ्जाता। सन्ध्यासमयः अपि संवृत्तः। ततः प्रभाते अत्र आगन्तव्यम् इति निश्चयः।

(अ) एकपदेन उत्तरत:
(i) त्रयो मत्स्याः कुत्र वसन्ति स्म?
(ii) जलाशयं दृष्ट्वा कैः उक्तम्?

(ब) पूर्णवाक्येन उत्तरत:
जलाशयं दृष्ट्वा मत्स्यजीविनः किम् उक्तवन्तः?

(स) यथानिर्देशम् उत्तरत:
(i) 'ह्रदः' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम्?
(ii) 'प्रातः' इत्यस्य स्थाने किं पर्यायपदम् अत्र प्रयुक्तम्।

(द) 'अयं ह्रदः न कदापि अस्माभिः अन्वेषितः' इत्यस्मिन् वाक्ये 'अस्माभिः' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

काञ्चुकीयः: इदम् आर्यचाणक्यगृहम्। अहो राजाधिराजमन्त्रिणो विभूतिः! तथाहि गोमयानाम् उपलभेदकम् एतत् प्रस्तरखण्डम्, इतः शिष्यैः आनीतानां दर्भाणां स्तूपः, अत्र शुष्यमाणैः समिद्भिः अतिनामितः छदिप्रान्तः, जीर्णा भित्तयः। अत एव निःस्पृहत्यागिभिः एतादृशैः जनैः राजा तृणवद् गण्यते।

(अ) एकपदेन उत्तरत:
(i) उपर्युक्तनाट्यांशे कस्य गृहं वर्ण्यते?
(ii) गोमयानाम् उपलभेदकं किम् अस्ति?

(ब) पूर्णवाक्येन उत्तरत:
राजा तृणवत् कैः गण्यते?

(स) यथानिर्देशम् उत्तरत:
(i) 'पाषाणखण्डम्' इत्यर्थे किं पर्यायपदमत्र प्रयुक्तम्?
(ii) 'शिष्यैः' इत्यस्य विलोमपदं किम्?

(द) 'राजाधिराजमन्त्रिणः' इति पदं कस्मै प्रयुक्तम्?

12. अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत -

शिक्षा क्षयं गच्छति कार्यपर्ययात् सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च सदैव तिष्ठति।।

(अ) एकपदेन उत्तरत:
(i) कालपर्ययात् का क्षयं गच्छति?
(ii) कीदृशाः पादपाः निपतन्ति?

(ब) पूर्णवाक्येन उत्तरत:
किं किं वस्तु सदैव तिष्ठति?

(स) यथानिर्देशम् उत्तरत:
(i) 'वृक्षाः' इत्यर्थे किं पदम् अत्र प्रयुक्तत्?
(ii) 'जलम्' इत्यस्य विशेषणं किम्?

(द) 'विनश्यति' इत्यर्थे के पदे अत्र प्रयुक्ते?

13. अधोदत्तम् पङ्क्ती: पठित्वा यथानिर्देशम् उत्तरत -

(अ) सुखं हि दुःयान्यनुभूय शोभते यथान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति।।
अस्य श्लोकस्य सन्दर्भग्रन्थं लेखकं च लिखत।

(ब) आर्येण एव सर्वत्र निरुद्धचेष्टस्य में बन्धनमिव राज्यम्, न राज्यमिव।
इदं वाक्यं कः कं प्रति कथयति?

14. प्रत्येकम् अंशस्य प्रदत्तभावार्थत्रयात् शुद्धभावार्थचयनं कुरुत -

(अ) सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।
भावार्थाः: (i) राजनि सचिवेषु परस्परं सहमतेषु राजस्य सर्वसमृद्धिर्भवति। (ii) नृपे सचिवेषु च परस्परं विरुद्धेषु सर्वसम्पदः समायान्ति। (iii) प्रजायाः नृपस्य च मध्ये सहमतावस्थायां सर्वसम्पदः समायान्ति।

(ब) लोभश्चेदगुणेन किम्?
भावार्थाः: (i) यदि मनुष्ये एको लोभ एव वर्तते, तदा अन्येषां दुर्गुणानां का आवश्यकता? (ii) लोभिनि जने न कोऽपि गुणो भवति। (iii) यदि मनुष्ये लोभः अस्ति, तर्हि गुणैः न किमपि प्रयोजनम्।

OR

OR

14. अधोलिखितश्लोकस्य प्रदत्तं भावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत -

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः। करणं परोपकरणं येषां केषां न ते वन्द्याः।।

ते जनाः सर्वत्र (i) _____ भवन्ति, येषां जीवनं (ii) _____ एव भवति। वस्तुतः तेषां (iii) _____ प्रमुखं लक्ष्यं (iv) _____ एव भवति। ते सदैव (v) _____ मधुरां च वार्णी (vi) _____। तेषां वदनं प्रसन्नतायाः (vii) _____ इव प्रतीयते। तेषां हृदयं (viii) _____ भवति।

मञ्जूषा: दयापूर्णम्, वन्दनीयाः, निवासस्थानम्, परोपकाराय, वदन्ति, परोपकारः, अमृतवर्षिणीम्, जीवनस्य।

15. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा लिखत -

(अ) अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्। आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत्।।
अन्वयः: अशक्तैः (i) _____ शत्रोः (ii) _____ कर्तव्यम्, अथवा (iii) _____ आश्रितव्यः, तेषाम् (iv) _____ गतिः न भवेत्।

(ब) यथा चतुर्भिः कनकं परीक्ष्यते निघर्षण-छेदन-तापताडनैः। तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा।।
अन्वयः: यथा (i) _____ चतुर्भिः कनकं परीक्ष्यते तथा (ii) _____ शीलेन (iii) _____ कर्मणा (iv) _____ पुरुषः परीक्ष्यते।

16. अधोलिखितवाक्यानां सार्थकसंयोजनं कृत्वा क्रमेण लिखत -

(i) शान्तं पापम्, शान्तं पापम्, न हि न हि विज्ञापयितुम्।
(ii) आर्य! चन्द्रगुप्तः प्रणमति (इति पादयोः पतति)।
(iii) अलं विनयेन, न निष्प्रयोजनं प्रभुभिः आहूयन्ते अधिकारिणः।
(iv) वृषल! किमर्थं वयमाहूताः?
(v) उत्तिष्ठ उत्तिष्ठ वत्स! विजयताम्।
(vi) आर्य! कौमुदीमहोत्सवस्य प्रतिषेधे किं फलम् आर्यः पश्यति?
(vii) आर्यस्य दर्शनेन आत्मानम् अनुग्रहीतुम्।
(viii) उपालब्धुं तर्हि वयमाहूताः।

17. अधोलिखितपंक्तिषु रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत -

(अ) कुण्डलम् आखण्डलदिशः। (i) पूर्वदिशः (ii) पश्चिमदिशः (iii) उत्तरदिशः।

(ब) वृषलः मां द्रष्टुम् इच्छति। (i) वृषराशिः (ii) वृक्षः (iii) चन्द्रगुप्तः।

(स) शान्तिरापः। (i) जलानि (ii) भवान् (iii) अत्र।

(द) हिमं गिरिराजस्य शोभां प्रवर्धयति। (i) गिरनारनगरस्य (ii) गुर्जरराजस्य (iii) हिमालयस्य।

18. अधोलिखितानां कवीनां देश-काल-कृतीनां यथानिर्देशं नामानि लिखत -

(अ) कवयः: (क) (i) अम्बिकादत्तव्यासः (ii) विशाखदत्तः [देशः]

(ख) (i) कालिदासः (ii) भर्तृहरिः [कालः]

(ग) (i) भारविः [कृतिः]

(ब) संस्कृतमहाकाव्यानां कान्यपि पञ्च वैशिष्ट्यानि लिखत। Write any five features of Sanskrit Mahakavyas.

अथवा (Or)

अधः मञ्जूषाप्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत -

(i) छन्दोरहिता रचना _____ कथ्यते, तस्य भेदद्वयमस्ति कथा _____ च।
(ii) कालिदासः _____ क्षेत्रे प्रसिद्धः, दण्डी च _____।
(iii) नाटके आदौ _____, भवति अन्ते च _____।
(iv) खण्डकाव्यं _____ काव्यस्य भेदोऽस्ति, _____ प्रसिद्धं खण्डकाव्यमस्ति।
(v) रूपकस्य _____ भेदाः भवन्ति, तेषु _____ अपि अन्यतमम्।

मञ्जूषा: नाटकम्, मेघदूतम्, भरतवाक्यम्, पदलालित्ये, आख्यायिका, दश, गद्यम् पद्य-, नान्दी, उपमा।

- End of Question Paper -